वृक्षाः परोपकाराय फलन्ति। वृक्षाः, पादपाः, तरवः, परोपकाराय परेषाम्, अन्येषाम् उपकाराय उपकारार्थं, हितार्थं फलन्ति। अन्येषां कृते परेषां कृते फलन्ति। न आत्मनः कृते इति अर्थः। अर्थात् वृक्षाः अन्येभ्यः प्राणिभ्यः फलं प्रयच्छन्ति। स्वयम् आत्मनः फलं न भक्षयन्ति न खादन्ति इति अर्थः। परोपकाराय फलन्ति वृक्षाः.

परोपकाराय वहन्ति नद्यः । नद्यः परोपकाराय वहन्ति अर्थात् नद्यः, सरितः अन्येषाम् उपकारार्थं वहन्ति। नद्यः स्वकीयं जलं स्वयं न पिबन्ति, किं तु अन्येभ्यः प्राणिभ्यः प्रयच्छन्ति। अतः परोपकाराय वहन्ति नद्यः।

परोपकाराय दुहन्ति गावः। गावः परोपकाराय दुहन्ति। अर्थात् गावः धेनवः परेषाम् उपकाराय दुहन्ति। धेनवः गावः आत्मनः कृते न दुहन्ति। आत्मनः कृते दुग्धं न प्रयच्छन्ति। स्वार्थाय दुग्धं न प्रयच्छन्ति किन्तु परार्थाय। अन्येभ्यः दुग्धं प्रयच्छन्ति। ताः स्वकीयं दुग्धं स्वयं न पिबन्ति इति अर्थः।

वृक्षाः स्वकीयं फलं स्वयं न खादन्ति, अन्येभ्यः प्रयच्छन्ति। नद्यः स्वकीयं जलं स्वयं न पिबन्ति, अन्येभ्यः प्रयच्छन्ति। गावः स्वकीयं दुग्धं स्वयं न पिबन्ति, अन्येभ्यः प्रयच्छन्ति।

अतः परोपकारार्थम् इदं शरीरम्। इदं शरीरं परोपकारार्थं भवति। इदम् अस्माकं शरीरम् अस्माकं देहः अस्माकं कायः परेषाम् उपकारार्थं भवति। स्वार्थाय न भवति। स्वस्य कृते न भवति इति अर्थः। यदि वृक्षाः, नद्यः, गावः, स्वर्थाय न भवन्ति, परार्थाय एव भवन्ति परस्य उपकाराय एव भवन्ति, तदा अस्माकं मनुष्याणां शरीरं, देहः अपि अन्येषां प्राणिनाम् उपकाराय एव भवति इति सुभाषितं ब्रूते ।